भवति । ननु च सप्तम्येकवचनस्य यदुदात्तयणः इति स्वरितत्वम्, तदसिद्धं [1]यणादेशे, तत् कथमयं [2]स्वरितयण् भवति ? आश्रयात् [3]सिद्धत्वं भविष्यति । यदि एवम्, 'उदात्तादनुदात्तस्य स्वरितः' (८.४.६६/३६६०) [4]इत्येतस्यापि आश्रयात् [5]सिद्धत्वं प्राप्नोति, ततश्च [6]दध्याशा इत्यत्रापि स्वरितः स्यात् ? तस्माद् अयमेव यण्स्वरो यणादेशे सिद्धो वक्तव्यः । केचित् तु ब्रुवते, उदात्तात् स्वरितयणोऽपि परस्य अनुदात्तस्य स्वरितत्वं दृश्यते । तथा [7]च तैत्तिरीयके शाखान्तरे पठ्यते – 'यास्ते [8]विश्वाः समिधः सन्त्यग्ने' (तै. ३.५.५.३) [9]इति । अग्ने इत्ययमकारः स्वरितः पठ्यते । तथा [10]ब्राह्मणेऽपि 'दध्याशयति' (तै.ब्रा. १.७.६.५) इत्याकारः स्वरितः पठ्यते इति । यथा तु वार्तिकं भाष्यं च, तथा उदात्तात् स्वरितयणः परस्य [11]अनुदात्तस्य अनेन स्वरितत्वं न भवति इति स्थितम् । तथा च भाष्ये स्वरितयण्ग्रहणमिदं प्रत्याख्यायते । सकृल्ल्व्याशा [12]इत्येवमादौ उदात्तयणः इत्येव स्वरितस्य सिद्धत्वात् । स्वरित[13]यण्व्यवधानमव्यवधानमेव, 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या. प. ३७) इति । तत [14]तु क्रियते, पूर्वस्मादपि विधौ स्थानिवद्भावात् व्यवधानमस्ति[15], स्वरदीर्घयलोपेषु च लोपाजादेशस्य स्थानिवद्भावः प्रतिषिध्यते इति । उदात्तस्वरितयोः इति किम् ? बैदी आशा बैद्याशा । शार्ङ्गरव्याशा । [16]अनुदात्तयणादेशोऽयम् । अनुदात्तस्य इति किम् ? कुमार्यत्र । किशोर्यत्र । अत्र इत्ययमाद्युदात्तो लित्स्वरेण ॥

## एकादेश उदात्तेनोदात्तः । (५/३६५८)

उदात्तेन सह अनुदात्तस्य य एकादेशः स उदात्तो भवति । [17]अनुदात्तस्य इति [18]वर्तते । [19]अग्नी । वायू । वृक्षैः । प्लक्षैः । उदात्तेन इति किम् ? पचन्ति । [20]यजन्ति । लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोः अयमेकादेशः[21], [22]पररूपे कर्तव्ये स्वरितस्यासिद्धत्वात् ॥

## स्वरितो वाऽनुदात्ते पदादौ । (६/३६५९)

अनुदात्ते पदादौ[23] उदात्तेन सह य एकादेशः स स्वरितो [24]वा भवति उदात्तो वा । सु उत्थितः – सूत्थितः, सूत्थितः । वि ईक्षते – वीक्षते, वीक्षते । वसुकः असि – वसुकोऽसि, वसुकोऽसि । सूत्थितः इति सुशब्दः 'सुः पूजायाम्' (१.४.९४/५५५) इति [25]कर्मप्रवचनीयः, तस्य प्रादित्वात् समासे सति अव्ययपूर्वप्रकृति[26]स्वरत्वेन आद्युदात्तः, शेषमनुदात्तम् [27]इति च अनुदात्ते पदादौ एकादेशो भवति । वीक्षते, वसुकोऽसि इत्यत्रापि

---

1. यणादेशस्य ब. 2. स्वरितस्य यण क. 3. सिद्धम् क, आश्रयासिद्धत्वे ह. 4. इत्यस्यापि इ. ब. 5. सिद्धत्वं नास्ति क. 6. दध्याशयति क. 7. हि ब. 8. विशाखा ब, विश्वा समिधः क. 9. नास्ति क. 10. ब्राह्मणोऽपि इ. 11. अनुदात्तस्य नास्ति ब. 12. खलप्वाशा इत्यधिकम् क. 13. यणा च ब. 14. तु नास्ति ब, न क. 15. इति इत्यधिकम् क. इ. ह. 16. वाक्यमिदं नास्ति क. 17. वाक्यमिदं नास्ति ब. ह. 18. निवर्तते क. 19. अग्नि औ अग्नी । वायु औ वायू । वृक्षौ, प्लक्षौ । ड. 20. नास्ति ब. 21. स्वरितो वाऽनुदात्ते पदादौ इत्यधिकम् ब. 22. वाक्यमिदं नास्ति ब. इ. ड. ह. ह. 23. परतः इत्यधिकम् क. ब. ह. ड. 24. वा नास्ति ब. 25. कर्मप्रवचनीयसञ्ज्ञः ब. ह. 26. स्वरेण ब. 27. तेन क. ब, च नास्ति क.